श्री वेंकटेश सहस्रनाम स्तोत्रं

श्रीवसिष्ठ उवाच |
भगवन् केन विधिना नामभिर्वेंकटेश्वरं |
पूजयामास तं देवं ब्रह्मा तु कमलैः शुभैः || 1 ||

पृच्छामि तानि नामानि गुणयोगपराणि किं |
मुख्यवृत्तीनि किं ब्रूहि लक्षकाण्यथवा हरेः || 2 ||

नारद उवाच |
नामान्यनंतानि हरेः गुणयोगानि कानि चित् |
मुख्यवृत्तीनि चान्यानि लक्षकाण्यपराणि च || 3 ||

परमार्थैः सर्वशब्दैरेको ज्ञेयः परः पुमान् |
आदिमध्यांतरहितस्त्वव्यक्तोऽनंतरूपभृत् || 4 ||

चंद्रार्कवह्निवाय्वाद्या ग्रहर्क्षाणि नभो दिशः |
अन्वयव्यतिरेकाभ्यां संति नो संति यन्मतेः || 5 ||

तस्य देवस्य नाम्नां हि पारं गंतुं हि कः क्षमः |
तथाऽपि चाभिधानानि वेंकटेशस्य कानिचित् || 6 ||

ब्रह्मगीतानि पुण्यानि तानि वक्ष्यामि सुव्रत |
यदुच्चारणमात्रेण विमुक्ताघः परं व्रजेत् || 7 ||

वेंकटेशस्य नाम्नां हि सहस्रस्य ऋषिर्विधिः |
छंदोऽनुष्टुप्तथा देवः श्रीवत्सांको रमापतिः || 8 ||

बीजभूतस्तथोंकारो ह्रीं क्लीं शक्तिश्च कीलकं |
ॐ नमो वेंकटेशायेत्यादिर्मंत्रोऽत्र कथ्यते || 9 ||

ब्रह्मांडगर्भः कवचमस्त्रं चक्रगदाधरः |
विनियोगोऽभीष्टसिद्धौ हृदयं सामगायनः || 10 ||

अस्य श्री वेंकटेश सहस्रनाम स्तोत्र महामंत्रस्य ब्रह्मा ऋषिः अनुष्टुप् छंदः श्रीवत्सांको रमापतिर्देवता ॐ बीजं ह्रीं शक्तिः क्लीं कीलकं ब्रह्मांडगर्भ इति कवचं चक्रगदाधर इत्यस्त्रं सामगानमिति हृदयं ॐ नमो वेंकटेशायेत्यादिर्मंत्रः श्री वेंकटेश प्रीत्यर्थे जपे विनियोगः ||

ध्यानं |
भास्वच्चंद्रमसौ यदीयनयने भार्या यदीया रमा
यस्माद्विश्वसृडप्यभूद्यमिकुलं यद्ध्यानयुक्तं सदा
नाथो यो जगतां नगेंद्रदुहितुर्नाथोऽपि यद्भक्तिमान्
तातो यो मदनस्य यो दुरितहा तं वेंकटेशं भजे ||

ऊर्ध्वौ हस्तौ यदीयौ सुररिपुदळने बिभ्रतौ शंखचक्रे
सेव्यावंघ्री स्वकीयावभिदधदधरो दक्षिणो यस्य पाणिः |
तावन्मात्रं भवाब्धिं गमयति भजतामूरुगो वामपाणिः
श्रीवत्सांकश्च लक्ष्मीर्यदुरसि लसतस्तं भजे वेंकटेशं ||

इति ध्यायन् वेंकटेशं श्रीवत्सांकं रमापतिं |
वेंकटेशो विरूपाक्ष इत्यारभ्य जपेत्क्रमात् ||

(स्तोत्रं)
ॐ वेंकटेशो विरूपाक्षो विश्वेशो विश्वभावनः |
विश्वसृड्विश्वसंहर्ता विश्वप्राणो विराड्वपुः || 1 ||

शेषाद्रिनिलयोऽशेषभक्तदुःखप्रणाशनः |
शेषस्तुत्यः शेषशायी विशेषज्ञो विभुः स्वभूः || 2 ||

विष्णुर्जिष्णुश्च वर्धिष्णुरुत्सहिष्णुः सहिष्णुकः |
भ्राजिष्णुश्च ग्रसिष्णुश्च वर्तिष्णुश्च भरिष्णुकः || 3 ||

कालयंता कालगोप्ता कालः कालांतकोऽखिलः |
कालगम्यः कालकंठवंद्यः कालकलेश्वरः || 4 ||

शंभुः स्वयंभूरंभोजनाभिः स्तंभितवारिधिः |
अंभोधिनंदिनीजानिः शोणांभोजपदप्रभः || 5 ||

कंबुग्रीवः शंबरारिरूपः शंबरजेक्षणः |
बिंबाधरो बिंबरूपी प्रतिबिंबक्रियातिगः || 6 ||

गुणवान् गुणगम्यश्च गुणातीतो गुणप्रियः |
दुर्गुणध्वंसकृत्सर्वसुगुणो गुणभासकः || 7 ||

परेशः परमात्मा च परंज्योतिः परा गतिः |
परं पदं वियद्वासाः पारंपर्यशुभप्रदः || 8 ||

ब्रह्मांडगर्भो ब्रह्मण्यो ब्रह्मसृड्ब्रह्मबोधितः |
ब्रह्मस्तुत्यो ब्रह्मवादी ब्रह्मचर्यपरायणः || 9 ||

सत्यव्रतार्थसंतुष्टः सत्यरूपी झषांगवान् |
सोमकप्राणहारी चाऽऽनीताम्नायोऽब्धिसंचरः || 10 ||

देवासुरवरस्तुत्यः पतन्मंदरधारकः |
धन्वंतरिः कच्छपांगः पयोनिधिविमंथकः || 11 ||

अमरामृतसंधाता धृतसंमोहिनीवपुः |
हरमोहकमायावी रक्षस्संदोहभंजनः || 12 ||

हिरण्याक्षविदारी च यज्ञो यज्ञविभावनः |
यज्ञीयोर्वीसमुद्धर्ता लीलाक्रोडः प्रतापवान् || 13 ||

दंडकासुरविध्वंसी वक्रदंष्ट्रः क्षमाधरः |
गंधर्वशापहरणः पुण्यगंधो विचक्षणः || 14 ||

करालवक्त्रः सोमार्कनेत्रः षड्गुणवैभवः |
श्वेतघोणी घूर्णितभ्रूर्घुर्घुरध्वनिविभ्रमः || 15 ||

द्राघीयान् नीलकेशी च जाग्रदंबुजलोचनः |
घृणावान् घृणिसम्मोहो महाकालाग्निदीधितिः || 16 ||

ज्वालाकराळवदनो महोल्काकुलवीक्षणः |
सटानिर्भिन्नमेघौघो दंष्ट्रारुग्व्याप्तदिक्तटः || 17 ||

उच्छ्वासाकृष्टभूतेशो निश्श्वासत्यक्तविश्वसृट् |
अंतर्भ्रमज्जगद्गर्भोऽनंतो ब्रह्मकपालहृत् || 18 ||

उग्रो वीरो महाविष्णुर्ज्वलनः सर्वतोमुखः |
नृसिंहो भीषणो भद्रो मृत्युमृत्युः सनातनः || 19 ||

सभास्तंभोद्भवो भीमः शीरोमाली महेश्वरः |
द्वादशादित्यचूडालः कल्पधूमसटाच्छविः || 20 ||

हिरण्यकोरःस्थलभिन्नखः सिंहमुखोऽनघः |
प्रह्लादवरदो धीमान् भक्तसंघप्रतिष्ठितः || 21 ||

ब्रह्मरुद्रादिसंसेव्यः सिद्धसाध्यप्रपूजितः |
लक्ष्मीनृसिंहो देवेशो ज्वालाजिह्वांत्रमालिकः || 22 ||

खड्गी खेटी महेष्वासी कपाली मुसली हली |
पाशी शूली महाबाहुर्ज्वरघ्नो रोगलुंठकः || 23 ||

मौंजीयुक् छात्रको दंडी कृष्णाजिनधरो वटुः |
अधीतवेदो वेदांतोद्धारको ब्रह्मनैष्ठिकः || 24 ||

अहीनशयनप्रीतः आदितेयोऽनघो हरिः |
संवित्प्रियः सामवेद्यो बलिवेश्मप्रतिष्ठितः || 25 ||

बलिक्षालितपादाब्जो विंध्यावलिविमानितः |
त्रिपादभूमिस्वीकर्ता विश्वरूपप्रदर्शकः || 26 ||

धृतत्रिविक्रमः स्वांघ्रिनखभिन्नांडखर्परः |
पज्जातवाहिनीधारापवित्रितजगत्त्रयः || 27 ||

विधिसम्मानितः पुण्यो दैत्ययोद्धा जयोर्जितः |
सुरराज्यप्रदः शुक्रमदहृत्सुगतीश्वरः || 28 ||

जामदग्न्यः कुठारी च कार्तवीर्यविदारणः |
रेणुकायाः शिरोहारी दुष्टक्षत्रियमर्दनः || 29 ||

वर्चस्वी दानशीलश्च धनुष्मान् ब्रह्मवित्तमः |
अत्युदग्रः समग्रश्च न्यग्रोधो दुष्टनिग्रहः || 30 ||

रविवंशसमुद्भूतो राघवो भरताग्रजः |
कौसल्यातनयो रामो विश्वामित्रप्रियंकरः || 31 ||

ताटकारिः सुबाहुघ्नो बलातिबलमंत्रवान् |
अहल्याशापविच्छेदी प्रविष्टजनकालयः || 32 ||

स्वयंवरसभासंस्थ ईशचापप्रभंजनः |
जानकीपरिणेता च जनकाधीशसंस्तुतः || 33 ||

जमदग्नितनूजातयोद्धाऽयोध्याधिपाग्रणीः |
पितृवाक्यप्रतीपालस्त्यक्तराज्यः सलक्ष्मणः || 34 ||

ससीतश्चित्रकूटस्थो भरताहितराज्यकः |
काकदर्पप्रहर्ता च दंडकारण्यवासकः || 35 ||

पंचवट्यां विहारी च स्वधर्मपरिपोषकः |
विराधहाऽगस्त्यमुख्यमुनिसम्मानितः पुमान् || 36 ||

इंद्रचापधरः खड्गधरश्चाक्षयसायकः |
खरांतको दूषणारिस्त्रिशिरस्करिपुर्वृषः || 37 ||

ततः शूर्पणखानासाच्छेत्ता वल्कलधारकः |
जटावान् पर्णशालास्थो मारीचबलमर्दकः || 38 ||

पक्षिराट्कृतसंवादो रवितेजा महाबलः |
शबर्यानीतफलभुक् हनूमत्परितोषितः || 39 ||

सुग्रीवाऽभयदो दैत्यकायक्षेपणभासुरः |
सप्ततालसमुच्छेत्ता वालिहृत्कपिसंवृतः || 40 ||

वायुसूनुकृतासेवस्त्यक्तपंपः कुशासनः |
उदन्वत्तीरगः शूरो विभीषणवरप्रदः || 41 ||

सेतुकृद्दैत्यहा प्राप्तलंकोऽलंकारवान् स्वयं |
अतिकायशिरश्छेत्ता कुंभकर्णविभेदनः || 42 ||

दशकंठशिरोध्वंसी जांबवत्प्रमुखावृतः |
जानकीशः सुराध्यक्षः साकेतेशः पुरातनः || 43 ||

पुण्यश्लोको वेदवेद्यः स्वामितीर्थनिवासकः |
लक्ष्मीसरःकेळिलोलो लक्ष्मीशो लोकरक्षकः || 44 ||

देवकीगर्भसंभूतो यशोदेक्षणलालितः |
वसुदेवकृतस्तोत्रो नंदगोपमनोहरः || 45 ||

चतुर्भुजः कोमलांगो गदावान्नीलकुंतलः |
पूतनाप्राणसंहर्ता तृणावर्तविनाशनः || 46 ||

गर्गारोपितनामांको वासुदेवो ह्यधोक्षजः |
गोपिकास्तन्यपायी च बलभद्रानुजोऽच्युतः || 47 ||

वैयाघ्रनखभूषश्च वत्सजिद्वत्सवर्धनः |
क्षीरसाराशनरतो दधिभांडप्रमर्दनः || 48 ||

नवनीतापहर्ता च नीलनीरदभासुरः |
आभीरदृष्टदौर्जन्यो नीलपद्मनिभाननः || 49 ||

मातृदर्शितविश्वाऽऽस्य उलूखलनिबंधनः |
नलकूबरशापांतो गोधूळिच्छुरितांगकः || 50 ||

गोसंघरक्षकः श्रीशो बृंदारण्यनिवासकः |
वत्सांतको बकद्वेषी दैत्यांबुदमहानिलः || 51 ||

महाजगरचंडाग्निः शकटप्राणकंटकः |
इंद्रसेव्यः पुण्यगात्रः खरजिच्चंडदीधितिः || 52 ||

तालपक्वफलाशी च काळीयफणिदर्पहा |
नागपत्नीस्तुतिप्रीतः प्रलंबासुरखंडनः || 53 ||

दावाग्निबलसंहारी फलाहारी गदाग्रजः |
गोपांगनाचेलचोरः पाथोलीलाविशारदः || 54 ||

वंशगानप्रवीणश्च गोपीहस्तांबुजार्चितः |
मुनिपत्न्याहृताहारो मुनिश्रेष्ठो मुनिप्रियः || 55 ||

गोवर्धनाद्रिसंधर्ता संक्रंदनतमोऽपहः |
सदुद्यानविलासी च रासक्रीडापरायणः || 56 ||

वरुणाभ्यर्चितो गोपीप्रार्थितः पुरुषोत्तमः |
अक्रूरस्तुतिसंप्रीतः कुब्जायौवनदायकः || 57 ||

मुष्टिकोरःप्रहारी च चाणूरोदरदारणः |
मल्लयुद्धाग्रगण्यश्च पितृबंधनमोचकः || 58 ||

मत्तमातंगपंचास्यः कंसग्रीवानिकृंतनः |
उग्रसेनप्रतिष्ठाता रत्नसिंहासनस्थितः || 59 ||

कालनेमिखलद्वेषी मुचुकुंदवरप्रदः |
साल्वसेवितदुर्धर्षराजस्मयनिवारणः || 60 ||

रुक्मिगर्वापहारी च रुक्मिणीनयनोत्सवः |
प्रद्युम्नजनकः कामी प्रद्युम्नो द्वारकाधिपः || 61 ||

मण्याहर्ता महामायो जांबवत्कृतसंगरः |
जांबूनदांबरधरो गम्यो जांबवतीविभुः || 62 ||

कालिंदीप्रथितारामकेलिर्गुंजावतंसकः |
मंदारसुमनोभास्वान् शचीशाभीष्टदायकः || 63 ||

सत्राजिन्मानसोल्लासी सत्याजानिः शुभावहः |
शतधन्वहरः सिद्धः पांडवप्रियकोत्सवः || 64 ||

भद्रप्रियः सुभद्राया भ्राता नाग्नाजितीविभुः |
किरीटकुंडलधरः कल्पपल्लवलालितः || 65 ||

भैष्मीप्रणयभाषावान् मित्रविंदाधिपोऽभयः |
स्वमूर्तिकेलिसंप्रीतो लक्ष्मणोदारमानसः || 66 ||

प्राग्ज्योतिषाधिपध्वंसी तत्सैन्यांतकरोऽमृतः |
भूमिस्तुतो भूरिभोगो भूषणांबरसंयुतः || 67 ||

बहुरामाकृताह्लादो गंधमाल्यानुलेपनः |
नारदादृष्टचरितो देवेशो विश्वराड्गुरुः || 68 ||

बाणबाहुविदारश्च तापज्वरविनाशकः |
उषोद्धर्षयिताऽव्यक्तः शिववाक्तुष्टमानसः || 69 ||

महेशज्वरसंस्तुत्यः शीतज्वरभयांतकः |
नृगराजोद्धारकश्च पौंड्रकादिवधोद्यतः || 70 ||

विविधारिच्छलोद्विग्नब्राह्मणेषु दयापरः |
जरासंधबलद्वेषी केशिदैत्यभयंकरः || 71 ||

चक्री चैद्यांतकः सभ्यो राजबंधविमोचकः |
राजसूयहविर्भोक्ता स्निग्धांगः शुभलक्षणः || 72 ||

धानाभक्षणसंप्रीतः कुचेलाभीष्टदायकः |
सत्त्वादिगुणगंभीरो द्रौपदीमानरक्षकः || 73 ||

भीष्मध्येयो भक्तवश्यो भीमपूज्यो दयानिधिः |
दंतवक्त्रशिरश्छेत्ता कृष्णः कृष्णासखः स्वराट् || 74 ||

वैजयंतीप्रमोदी च बर्हिबर्हविभूषणः |
पार्थकौरवसंधानकारी दुश्शासनांतकः || 75 ||

बुद्धो विशुद्धः सर्वज्ञः क्रतुहिंसाविनिंदकः |
त्रिपुरस्त्रीमानभंगः सर्वशास्त्रविशारदः || 76 ||

निर्विकारो निर्ममश्च निराभासो निरामयः |
जगन्मोहकधर्मी च दिग्वस्त्रो दिक्पतीश्वरः || 77 ||

कल्की म्लेच्छप्रहर्ता च दुष्टनिग्रहकारकः |
धर्मप्रतिष्टाकारी च चातुर्वर्ण्यविभागकृत् || 78 ||

युगांतको युगाक्रांतो युगकृद्युगभासकः |
कामारिः कामकारी च निष्कामः कामितार्थदः || 79 ||

भर्गो वरेण्यः सवितुः शार्ङ्गी वैकुंठमंदिरः |
हयग्रीवः कैटभारिः ग्राहघ्नो गजरक्षकः || 80 ||

सर्वसंशयविच्छेत्ता सर्वभक्तसमुत्सुकः |
कपर्दी कामहारी च कला काष्ठा स्मृतिर्धृतिः || 81 ||

अनादिरप्रमेयौजाः प्रधानः सन्निरूपकः |
निर्लेपो निःस्पृहोऽसंगो निर्भयो नीतिपारगः || 82 ||

निष्प्रेष्यो निष्क्रियः शांतो निष्प्रपंचो निधिर्नयः
कर्म्यकर्मी विकर्मी च कर्मेप्सुः कर्मभावनः || 83 ||

कर्मांगः कर्मविन्यासो महाकर्मी महाव्रती |
कर्मभुक्कर्मफलदः कर्मेशः कर्मनिग्रहः || 84 ||

नरो नारायणो दांतः कपिलः कामदः शुचिः |
तप्ता जप्ताऽक्षमालावान् गंता नेता लयो गतिः || 85 ||

शिष्टो द्रष्टा रिपुद्वेष्टा रोष्टा वेष्टा महानटः |
रोद्धा बोद्धा महायोद्धा श्रद्धावान् सत्यधीः शुभः || 86 ||

मंत्री मंत्रो मंत्रगम्यो मंत्रकृत्परमंत्रहृत् |
मंत्रभृन्मंत्रफलदो मंत्रेशो मंत्रविग्रहः || 87 ||

मंत्रांगो मंत्रविन्यासो महामंत्रो महाक्रमः |
स्थिरधीः स्थिरविज्ञानः स्थिरप्रज्ञः स्थिरासनः || 88 ||

स्थिरयोगः स्थिराधारः स्थिरमार्गः स्थिरागमः |
निश्श्रेयसो निरीहोऽग्निर्निरवद्यो निरंजनः || 89 ||

निर्वैरो निरहंकारो निर्दंभो निरसूयकः |
अनंतोऽनंतबाहूरुरनंतांघ्रिरनंतदृक् || 90 ||

अनंतवक्त्रोऽनंतांगोऽनंतरूपो ह्यनंतकृत् |
ऊर्ध्वरेता ऊर्ध्वलिंगो ह्यूर्ध्वमूर्धोर्ध्वशाखकः || 91 ||

ऊर्ध्व ऊर्ध्वाध्वरक्षी च ह्यूर्ध्वज्वालो निराकुलः |
बीजं बीजप्रदो नित्यो निदानं निष्कृतिः कृती || 92 ||

महानणीयन् गरिमा सुषमा चित्रमालिकः |
नभः स्पृङ्नभसो ज्योतिर्नभस्वान्निर्नभा नभः || 93 ||

अभुर्विभुः प्रभुः शंभुर्महीयान् भूर्भुवाकृतिः |
महानंदो महाशूरो महोराशिर्महोत्सवः || 94 ||

महाक्रोधो महाज्वालो महाशांतो महागुणः |
सत्यव्रतः सत्यपरः सत्यसंधः सतां गतिः || 95 ||

सत्येशः सत्यसंकल्पः सत्यचारित्रलक्षणः |
अंतश्चरो ह्यंतरात्मा परमात्मा चिदात्मकः || 96 ||

रोचनो रोचमानश्च साक्षी शौरिर्जनार्दनः |
मुकुंदो नंदनिष्पंदः स्वर्णबिंदुः पुरंदरः || 97 ||

अरिंदमः सुमंदश्च कुंदमंदारहासवान् |
स्यंदनारूढचंडांगो ह्यानंदी नंदनंदनः || 98 ||

अनसूयानंदनोऽत्रिनेत्रानंदः सुनंदवान् |
शंखवान्पंकजकरः कुंकुमांको जयांकुशः || 99 ||

अंभोजमकरंदाढ्यो निष्पंकोऽगरुपंकिलः |
इंद्रश्चंद्ररथश्चंद्रोऽतिचंद्रश्चंद्रभासकः || 100 ||

उपेंद्र इंद्रराजश्च वागिंद्रश्चंद्रलोचनः |
प्रत्यक् पराक् परंधाम परमार्थः परात्परः || 101 ||

अपारवाक् पारगामी पारावारः परावरः |
सहस्वानर्थदाता च सहनः साहसी जयी || 102 ||

तेजस्वी वायुविशिखी तपस्वी तापसोत्तमः |
ऐश्वर्योद्भूतिकृद्भूतिरैश्वर्यांगकलापवान् || 103 ||

अंभोधिशायी भगवान् सर्वज्ञः सामपारगः |
महायोगी महाधीरो महाभोगी महाप्रभुः || 104 ||

महावीरो महातुष्टिर्महापुष्टिर्महागुणः |
महादेवो महाबाहुर्महाधर्मो महेश्वरः || 105 ||

समीपगो दूरगामी स्वर्गमार्गनिरर्गलः |
नगो नगधरो नागो नागेशो नागपालकः || 106 ||

हिरण्मयः स्वर्णरेता हिरण्यार्चिर्हिरण्यदः |
गुणगण्यः शरण्यश्च पुण्यकीर्तिः पुराणगः || 107 ||

जन्यभृज्जन्यसन्नद्धो दिव्यपंचायुधो वशी |
दौर्जन्यभंगः पर्जन्यः सौजन्यनिलयोऽलयः || 108 ||

जलंधरांतको भस्मदैत्यनाशी महामनाः |
श्रेष्ठः श्रविष्ठो द्राघिष्ठो गरिष्ठो गरुडध्वजः || 109 ||

ज्येष्ठो द्रढिष्ठो वर्षिष्ठो द्राघीयान् प्रणवः फणी |
संप्रदायकरः स्वामी सुरेशो माधवो मधुः || 110 ||

निर्निमेषो विधिर्वेधा बलवान् जीवनं बली |
स्मर्ता श्रोता विकर्ता च ध्याता नेता समोऽसमः || 111 ||

होता पोता महावक्ता रंता मंता खलांतकः |
दाता ग्राहयिता माता नियंताऽनंतवैभवः || 112 ||

गोप्ता गोपयिता हंता धर्मजागरिता धवः |
कर्ता क्षेत्रकरः क्षेत्रप्रदः क्षेत्रज्ञ आत्मवित् || 113 ||

क्षेत्री क्षेत्रहरः क्षेत्रप्रियः क्षेमकरो मरुत् |
भक्तिप्रदो मुक्तिदायी शक्तिदो युक्तिदायकः || 114 ||

शक्तियुङ्नौक्तिकस्रग्वी सूक्तिराम्नायसूक्तिगः |
धनंजयो धनाध्यक्षो धनिको धनदाधिपः || 115 ||

महाधनो महामानी दुर्योधनविमानितः |
रत्नाकरो रत्नरोची रत्नगर्भाश्रयः शुचिः || 116 ||

रत्नसानुनिधिर्मौळिरत्नभा रत्नकंकणः |
अंतर्लक्ष्योऽंतरभ्यासी चांतर्ध्येयो जितासनः || 117 ||

अंतरंगो दयावांश्च ह्यंतर्मायो महार्णवः |
सरसः सिद्धरसिकः सिद्धिः साध्यः सदागतिः || 118 ||

आयुःप्रदो महायुष्मानर्चिष्मानोषधीपतिः |
अष्टश्रीरष्टभागोऽष्टककुब्व्याप्तयशो व्रती || 119 ||

अष्टापदः सुवर्णाभो ह्यष्टमूर्तिस्त्रिमूर्तिमान् |
अस्वप्नः स्वप्नगः स्वप्नः सुस्वप्नफलदायकः || 120 ||

दुःस्वप्नध्वंसको ध्वस्तदुर्निमित्तः शिवंकरः |
सुवर्णवर्णः संभाव्यो वर्णितो वर्णसम्मुखः || 121 ||

सुवर्णमुखरीतीरशिवध्यातपदांबुजः |
दाक्षायणीवचस्तुष्टो दूर्वासोदृष्टिगोचरः || 122 ||

अंबरीषव्रतप्रीतो महाकृत्तिविभंजनः |
महाभिचारकध्वंसी कालसर्पभयांतकः || 123 ||

सुदर्शनः कालमेघश्यामः श्रीमंत्रभावितः |
हेमांबुजसरःस्नायी श्रीमनोभावितकृतिः || 124 ||

श्रीप्रदत्तांबुजस्रग्वी श्रीकेळिः श्रीनिधिर्भवः |
श्रीप्रदो वामनो लक्ष्मीनायकश्च चतुर्भुजः || 125 ||

संतृप्तस्तर्पितस्तीर्थस्नातृसौख्यप्रदर्शकः |
अगस्त्यस्तुतिसंहृष्टो दर्शिताव्यक्तभावनः || 126 ||

कपिलार्चिः कपिलवान् सुस्नाताघविपाटनः |
वृषाकपिः कपिस्वामिमनोऽन्तःस्थितविग्रहः || 127 ||

वह्निप्रियोऽर्थसंभाव्यो जनलोकविधायकः |
वह्निप्रभो वह्नितेजाः शुभाभीष्टप्रदो यमी || 128 ||

वारुणक्षेत्रनिलयो वरुणो वारणार्चितः |
वायुस्थानकृतावासो वायुगो वायुसंभृतः || 129 ||

यमांतकोऽभिजननो यमलोकनिवारणः |
यमिनामग्रगण्यश्च संयमी यमभावितः || 130 ||

इंद्रोद्यानसमीपस्थः इंद्रदृग्विषयः प्रभुः |
यक्षराट् सरसीवासो ह्यक्षय्यनिधिकोशकृत् || 131 ||

स्वामितीर्थकृतावासः स्वामिध्येयो ह्यधोक्षजः |
वराहाद्यष्टतीर्थाभिसेवितांघ्रिसरोरुहः || 132 ||

पांडुतीर्थाभिषिक्तांगो युधिष्ठिरवरप्रदः |
भीमांतःकरणारूढः श्वेतवाहनसख्यवान् || 133 ||

नकुलाभयदो माद्रीसहदेवाभिवंदितः |
कृष्णाशपथसंधाता कुंतीस्तुतिरतो दमी || 134 ||

नारदादिमुनिस्तुत्यो नित्यकर्मपरायणः |
दर्शिताव्यक्तरूपश्च वीणानादप्रमोदितः || 135 ||

षट्कोटितीर्थचर्यावान् देवतीर्थकृताश्रमः |
बिल्वामलजलस्नायी सरस्वत्यंबुसेवितः || 136 ||

तुंबुरूदकसंस्पर्शजनचित्ततमोऽपहः |
मत्स्यवामनकूर्मादितीर्थराजः पुराणभृत् || 137 ||

चक्रध्येयपदांभोजः शंखपूजितपादुकः |
रामतीर्थविहारी च बलभद्रप्रतिष्ठितः || 138 ||

जामदग्न्यसरस्तीर्थजलसेचनतर्पितः |
पापापहारिकीलालसुस्नाताघविनाशनः || 139 ||

नभोगंगाभिषिक्तश्च नागतीर्थाभिषेकवान् |
कुमारधारातीर्थस्थो वटुवेषः सुमेखलः || 140 ||

वृद्धस्य सुकुमारत्वप्रदः सौंदर्यवान् सुखी |
प्रियंवदो महाकुक्षिरिक्ष्वाकुकुलनंदनः || 141 ||

नीलगोक्षीरधाराभूर्वराहाचलनायकः |
भरद्वाजप्रतिष्ठावान् बृहस्पतिविभावितः || 142 ||

अंजनाकृतपूजावान् आंजनेयकरार्चितः |
अंजनाद्रिनिवासश्च मुंजकेशः पुरंदरः || 143 ||

किन्नरद्वयसंबंधिबंधमोक्षप्रदायकः |
वैखानसमखारंभो वृषज्ञेयो वृषाचलः || 144 ||

वृषकायप्रभेत्ता च क्रीडनाचारसंभ्रमः |
सौवर्चलेयविन्यस्तराज्यो नारायणः प्रियः || 145 ||

दुर्मेधोभंजकः प्राज्ञो ब्रह्मोत्सवमहोत्सुकः |
भद्रासुरशिरश्छेत्ता भद्रक्षेत्री सुभद्रवान् || 146 ||

मृगयाऽक्षीणसन्नाहः शंखराजन्यतुष्टिदः |
स्थाणुस्थो वैनतेयांगभावितो ह्यशरीरवान् || 147 ||

भोगींद्रभोगसंस्थानो ब्रह्मादिगणसेवितः |
सहस्रार्कच्छटाभास्वद्विमानांतःस्थितो गुणी || 148 ||

विष्वक्सेनकृतस्तोत्रः सनंदनवरीवृतः |
जाह्नव्यादिनदीसेव्यः सुरेशाद्यभिवंदितः || 149 ||

सुरांगनानृत्यपरो गंधर्वोद्गायनप्रियः |
राकेंदुसंकाशनखः कोमलांघ्रिसरोरुहः || 150 ||

कच्छपप्रपदः कुंदगुल्फकः स्वच्छकूर्परः |
मेदुरस्वर्णवस्त्राढ्यकटिदेशस्थमेखलः || 151 ||

प्रोल्लसच्छुरिकाभास्वत्कटिदेशः शुभंकरः |
अनंतपद्मजस्थाननाभिर्मौक्तिकमालिकः || 152 ||

मंदारचांपेयमाली रत्नाभरणसंभृतः |
लंबयज्ञोपवीती च चंद्रश्रीखंडलेपवान् || 153 ||

वरदोऽभयदश्चक्री शंखी कौस्तुभदीप्तिमान् |
श्रीवत्सांकितवक्षस्को लक्ष्मीसंश्रितहृत्तटः || 154 ||

नीलोत्पलनिभाकारः शोणांभोजसमाननः |
कोटिमन्मथलावण्यश्चंद्रिकास्मितपूरितः || 155 ||

सुधास्वच्छोर्ध्वपुंड्रश्च कस्तूरीतिलकांचितः |
पुंडरीकेक्षणः स्वच्छो मौलिशोभाविराजितः || 156 ||

पद्मस्थः पद्मनाभश्च सोममंडलगो बुधः |
वह्निमंडलगः सूर्यः सूर्यमंडलसंस्थितः || 157 ||

श्रीपतिर्भूमिजानिश्च विमलाद्यभिसंवृतः |
जगत्कुटुंबजनिता रक्षकः कामितप्रदः || 158 ||

अवस्थात्रययंता च विश्वतेजस्स्वरूपवान् |
ज्ञप्तिर्ज्ञेयो ज्ञानगम्यो ज्ञानातीतः सुरातिगः || 159 ||

ब्रह्मांडांतर्बहिर्व्याप्तो वेंकटाद्रिगदाधरः |
वेंकटाद्रिगदाधर ॐ नमः इति ||
एवं श्रीवेंकटेशस्य कीर्तितं परमाद्भुतं || 160 ||

नाम्नां सहस्रं संश्राव्यं पवित्रं पुण्यवर्धनं |
श्रवणात्सर्वदोषघ्नं रोगघ्नं मृत्युनाशनं || 1 ||

दारिद्र्यभेदनं धर्म्यं सर्वैश्वर्यफलप्रदं |
कालाहिविषविच्छेदि ज्वरापस्मारभंजनं || 2 ||

[शत्रुक्षयकरं राजग्रहपीडानिवारणं |
ब्रह्मराक्षसकूष्मांडभेतालभयभंजनं ||]

विद्याभिलाषी विद्यावान् धनार्थी धनवान् भवेत् |
अनंतकल्पजीवी स्यादायुष्कामो महायशाः || 3 ||

पुत्रार्थी सुगुणान्पुत्रान् लभेताऽऽयुष्मतस्ततः |
संग्रामे शत्रुविजयी सभायां प्रतिवादिजित् || 4 ||

दिव्यैर्नामभिरेभिस्तु तुलसीपूजनात्सकृत् |
वैकुंठवासी भगवत्सदृशो विष्णुसन्निधौ || 5 ||

कल्हारपूजनान्मासात् द्वितीय इव यक्षराट् |
नीलोत्पलार्चनात्सर्वराजपूज्यः सदा भवेत् || 6 ||

हृत्संस्थितैर्नामभिस्तु भूयाद्दृग्विषयो हरिः |
वांछितार्थं तदा दत्वा वैकुंठं च प्रयच्छति || 7 ||

त्रिसंध्यं यो जपेन्नित्यं संपूज्य विधिना विभुं |
त्रिवारं पंचवारं वा प्रत्यहं क्रमशो यमी || 8 ||

मासादलक्ष्मीनाशः स्यात् द्विमासात् स्यान्नरेंद्रता |
त्रिमासान्महदैश्वर्यं ततः संभाषणं भवेत् || 9 ||

मासं पठन्न्यूनकर्मपूर्तिं च समवाप्नुयात् |
मार्गभ्रष्टश्च सन्मार्गं गतस्वः स्वं स्वकीयकं || 10 ||

चांचल्यचित्तोऽचांचल्यं मनस्स्वास्थ्यं च गच्छति |
आयुरारोग्यमैश्वर्यं ज्ञानं मोक्षं च विंदति || 11 ||

सर्वान्कामानवाप्नोति शाश्वतं च पदं तथा |
सत्यं सत्यं पुनस्सत्यं सत्यं सत्यं न संशयः || 12 ||

इति श्री ब्रह्मांडपुराणे वसिष्ठनारदसंवादे श्रीवेंकटाचलमाहात्म्ये श्री वेंकटेश सहस्रनाम स्तोत्रं समाप्तं |